# Raghuvansha by Kalidas Chapter 1

# રઘુવંશં સર્ગઃ ૧ કાલિદાસકૃતમ્

## Document Information

Text title : Raghuvansha sarga 1

File name : raghuvansha1.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : Kavi Kalidas

Transliterated by : Mrs. D. H. Rao

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : January 21, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧ કાલિદાસકૃતમ્

વાગર્થાવિવ સંપૃક્તૌ વાગર્થપ્રતિપત્તયે ।
જગતઃ પિતરૌ વન્દે પાર્વતીપરમેશ્વરૌ ॥ ૧-૧॥

ક્વ સૂર્યપ્રભવો વંશઃ ક્વ ચાલ્પવિષયા મતિઃ ।
તિતીર્ષુર્દુસ્તરં મોહાદુડુપેનાસ્મિ સાગરમ્ ॥ ૧-૨॥

મન્દઃ કવિયશઃ પ્રાર્થી ગમિષ્યામ્યુપહાસ્યતામ્ ।
પ્રાંશુલભ્યે ફલે લોભાદુદ્બાહુરિવ વામનઃ ॥ ૧-૩॥

અથવા કૃતવાગ્દ્વારે વંશેઽસ્મિન્પૂર્વસૂરિભિઃ ।
મણૌ વજ્રસમુત્કીર્ણે સૂત્રસ્યેવાસ્તિ મે ગતિઃ ॥ ૧-૪॥

સોઽહમાજન્મશુદ્ધાનામાફલોદયકર્મણામ્ ।
આસમુદ્રક્ષિતીશાનામાનાકરથવર્ત્મનામ્ ॥ ૧-૫॥

યથાવિધિહુતાગ્નીનાં યથાકામાર્ચિતાર્થિનામ્ ।
યથાપરાધદણ્ડાનાં યથાકાલપ્રબોધિનામ્ ॥ ૧-૬॥

ત્યાગાય સંભૃતાર્થાનાં સત્યાય મિતભાષિણામ્ ।
યશસે વિજિગીષૂણાં પ્રજાયૈ ગૃહમેધિનામ્ ॥ ૧-૭॥

શૈશવેઽભ્યસ્તવિદ્યાનાં યૌવને વિષયૈષિણામ્ ।
વાર્દ્ધકે મુનિવૃત્તીનાં યોગેનાન્તે તનુત્યજામ્ ॥ ૧-૮॥

રઘૂણામન્વયં વક્ષ્યે તનુવાગ્વિભવોઽપિ સન્ ।
તદ્ગુણૈઃ કર્ણમાગત્ય ચાપલાય પ્રચોદિતઃ ॥ ૧-૯॥

તં સન્તઃ શ્રોતુમર્હન્તિ સદસદ્વ્યક્તિહેતવઃ ।
હેમ્નઃ સંલક્ષ્યતે હ્યગ્નૌ વિશુદ્ધિઃ શ્યામિકાઽપિ વા ॥ ૧-૧૦॥

વૈવસ્વતો મનુર્નામ માનનીયો મનીષિણામ્ ।
આસીન્મહીક્ષિતામાદ્યઃ પ્રણવશ્છન્દસામિવ ॥ ૧-૧૧॥

તદન્વયે શુદ્ધિમતિ પ્રસૂતઃ શુદ્ધિમત્તરઃ ।
દિલીપ ઇતિ રાજેન્દુરિન્દુઃ ક્ષીરનિધાવિવ ॥ ૧-૧૨॥

વ્યૂઢોરસ્કો વૃષસ્કન્ધઃ શાલપ્રાંશુર્મહાભુજઃ ।
આત્મકર્મક્ષમં દેહં ક્ષાત્રો ધર્મ ઇવાશ્રિતઃ ॥ ૧-૧૩॥

સર્વાતિરિક્તસારેણ સર્વતેજોઽભિભાવિના ।
સ્થિતઃ સર્વોન્નતેનોર્વીં ક્રાન્ત્વા મેરુરિવાત્મના ॥ ૧-૧૪॥

આકારસદૃશપ્રજ્ઞઃ પ્રજ્ઞયા સદૃશાગમઃ ।
આગમૈઃ સદૃશારમ્ભ આરમ્ભસદૃશોદયઃ ॥ ૧-૧૫॥

ભીમકાન્તૈર્નૃપગુણૈઃ સ બભૂવોપજીવિનામ્ ।
અધૃષ્યશ્ચાભિગમ્યશ્ચ યાદોરત્નૈરિવાર્ણવઃ ॥ ૧-૧૬॥

રેખામાત્રમપિ ક્ષુણ્ણાદા મનોર્વર્ત્મનઃ પરમ્ ।
ન વ્યતીયુઃ પ્રજાસ્તસ્ય નિયન્તુર્નેમિવૃત્તયઃ ॥ ૧-૧૭॥

પ્રજાનામેવ ભૂત્યર્થં સ તાભ્યો બલિમગ્રહીત્ ।
સહસ્રગુણમુત્સ્રષ્ટુમાદત્તે હિ રસં રવિઃ ॥ ૧-૧૮॥

સેના પરિચ્છદસ્તસ્ય દ્વયમેવાર્થસાધનમ્ ।
શાસ્ત્રેષ્વકુણ્ઠિતા બુદ્ધિર્મૌર્વી ધનુષિ ચાતતા ॥ ૧-૧૯॥

તસ્ય સંવૃતમન્ત્રસ્ય ગૂઢાકારેઙ્ગિતસ્ય ચ ।
ફલાનુમેયાઃ પ્રારમ્ભાઃ સંસ્કારાઃ પ્રાક્તના ઇવ ॥ ૧-૨૦॥

જુગોપાત્માનમત્રસ્તઃ ભેજે ધર્મમનાતુરઃ ।
અગૃધ્નુરાદદે સોઽર્થમસક્તઃ સુખમન્વભૂત્ ॥ ૧-૨૧॥

જ્ઞાને મૌનં ક્ષમા શક્તૌ ત્યાગે શ્લાઘાવિપર્યયઃ ।
ગુણા ગુણાનુબન્ધિત્વાત્તસ્ય સપ્રસવા ઇવ ॥ ૧-૨૨॥

અનાકૃષ્ટસ્ય વિષયૈર્વિદ્યાનાં પારદૃશ્વનઃ ।
તસ્ય ધર્મરતેરાસીદ્વૃદ્ધત્વં જરસા વિના ॥ ૧-૨૩॥

પ્રજાનાં વિનયાધાનાદ્રક્ષણાદ્ભરણાદપિ ।
સ પિતા પિતરસ્તાસાં કેવલં જન્મહેતવઃ ॥ ૧-૨૪॥

સ્થિત્યૈ દણ્ડયતો દણ્ડ્યાન્પરિણેતુઃ પ્રસૂતયે ।
અપ્યર્થકામૌ તસ્યાસ્તાં ધર્મ એવ મનીષિણઃ ॥ ૧-૨૫॥

દુદોહ ગાં સ યજ્ઞાય સસ્યાય મઘવા દિવમ્ ।
સમ્પદ્વિનિયમેનોભૌ દધતુર્ભુવનદ્વયમ્ ॥ ૧-૨૬॥

ન કિલાનુનયુસ્તસ્ય રાજાનો રક્ષિતુર્યશઃ ।
વ્યાવૃત્તા યત્પરસ્વેભ્યઃ શ્રુતૌ તસ્કરતા સ્થિતા ॥ ૧-૨૭॥

દ્વેષ્યોઽપિ સમ્મતઃ શિષ્ટસ્તસ્યાર્તસ્ય યથૌષધમ્ ।
ત્યાજ્યો દુષ્ટઃ પ્રિયોઽપ્યાસીદઙ્ગુલીવોરગક્ષતા ॥ ૧-૨૮॥

તં વેધા વિદધે નૂનં મહાભૂતસમાધિના ।
તથા હિ સર્વે તસ્યાસન્પરાર્થૈકફલા ગુણાઃ ॥ ૧-૨૯॥

સ વેલાવપ્રવલયાં પરિખીકૃતસાગરામ્ ।
અનન્યશાસનામુર્વી શશાસૈકપુરીમિવ ॥ ૧-૩૦॥

તસ્ય દાક્ષિણ્યરૂઢેન નામ્ના મગધવંશજા ।
પત્ની સુદક્ષિણેત્યાસીદધ્વરસ્યેવ દક્ષિણા ॥ ૧-૩૧॥

કલત્રવન્તમાત્માનમવરોધે મહત્યપિ ।
તયા મેને મનસ્વિન્યા લક્ષ્મ્યા ચ વસુધાધિપઃ ॥ ૧-૩૨॥

તસ્યામાત્માનુરૂપાયામાત્મજન્મસમુત્સુકઃ ।
વિલમ્બિતફલૈઃ કાલં સ નિનાય મનોરથૈઃ ॥ ૧-૩૩॥

સન્તાનાર્થાય વિધયે સ્વભુજાદવતારિતા ।
તેન ધૂર્જગતો ગુર્વી સચિવેષુ નિચિક્ષિપે ॥ ૧-૩૪॥

અથાભ્યર્ચ્ય વિધાતારં પ્રયતૌ પુત્રકામયા ।
તૌ દમ્પતી વસિષ્ઠસ્ય ગુરોર્જગ્મતુરાશ્રમમ્ ॥ ૧-૩૫॥

સ્નિગ્ધગમ્ભીરનિર્ઘોષમેકં સ્યન્દનમાશ્રિતૌ ।
પ્રાવૃષેણ્યં પયોવાહં વિદ્યુદૈરાવતાવિવ ॥ ૧-૩૬॥

મા ભૂદાશ્રમપીડેતિ પરિમેયપુરસ્સરૌ ।
અનુભાવવિશેષાત્તુ સેનાપરિવૃતાવિવ ॥ ૧-૩૭॥

સેવ્યમાનૌ સુખસ્પર્શૈઃ શાલનિર્યાસગન્ધિભિઃ ।
પુષ્પરેણૂત્કિરૈર્વાતૈરાધૂતવનરાજિભિઃ ॥ ૧-૩૮॥

મનોભિરામાઃ શૃણ્વન્તૌ રથનેમિસ્વનોન્મુખૈઃ ।

ષડ્જસંવાદિનીઃ કેકા દ્વિધા ભિન્નાઃ શિખણ્ડિભિઃ ॥ ૧-૩૯॥

પરસ્પરાક્ષિસાદૃશ્યમદૂરોજ્ઝિતવર્ત્મસુ ।
મૃગદ્વન્દ્વેષુ પશ્યન્તૌ સ્યન્દનાબદ્ધદૃષ્ટિષુ ॥ ૧-૪૦॥

શ્રેણીબન્ધાદ્વિતન્વદ્ભિરસ્તમ્ભાં તોરણસ્રજમ્ ।
સારસૈઃ કલનિર્હ્રાદૈઃ ક્વચિદુન્નમિતાનનૌ ॥ ૧-૪૧॥

પવનસ્યાનુકૂલત્વાત્પ્રાર્થનાસિદ્ધિશંસિનઃ ।
રજોભિસ્તુરગોત્કીર્ણૈરસ્પૃષ્ટાલકવેષ્ટનૌ ॥ ૧-૪૨॥

સરસીષ્વરવિન્દાનાં વીચિવિક્ષોભશીતલમ્ ।
આમોદમુપજિઘ્રન્તૌ સ્વનિઃશ્વાસાનુકારિણમ્ ॥ ૧-૪૩॥

ગ્રામેષ્વાત્મવિસૃષ્ટેષુ યૂપચિહ્નેષુ યજ્વનામ્ ।
અમોઘાઃ પ્રતિગૃહ્ણન્તાવર્ઘ્યાનુપદમાશિષઃ ॥ ૧-૪૪॥

હૈયઙ્ગવીનમાદાય ઘોષવૃદ્ધાનુપસ્થિતાન્ ।
નામધેયાનિ પૃચ્છન્તૌ વન્યાનાં માર્ગશાખિનામ્ ॥ ૧-૪૫॥

કાપ્યભિખ્યા તયોરાસીદ્વ્રજતોઃ શુદ્ધવેષયોઃ ।
હિમનિર્મુક્તયોર્યોગે ચિત્રાચન્દ્રમસોરિવ ॥ ૧-૪૬॥

તત્તદ્ભૂમિપતિઃ પત્ન્યૈ દર્શયન્પ્રિયદર્શનઃ ।
અપિ લઙ્ઘિતમધ્વાનં બુબુધે ન બુધોપમઃ ॥ ૧-૪૭॥

સ દુષ્પ્રાપયશાઃ પ્રાપદાશ્રમં શ્રાન્તવાહનઃ ।
સાયં સંયમિનસ્તસ્ય મહર્ષેર્મહિષીસખઃ ॥ ૧-૪૮॥

વનાન્તરાદુપાવૃત્તૈઃ સમિત્કુશફલાહરૈઃ ।
પૂર્યમાણમદૃશ્યાગ્નિપ્રત્યુદ્યાત્યૈસ્તપસ્વિભિઃ ॥ ૧-૪૯॥

આકીર્ણમૃષિપત્નીનામુટજદ્વારરોધિભિઃ ।
અપત્યૈરિવ નીવારભાગધેયોચિતૈર્મૃગૈઃ ॥ ૧-૫૦॥

સેકાન્તે મુનિકન્યાભિસ્તત્ક્ષણોજ્ઝિતવૃક્ષકમ્ ।
વિશ્વાસાય વિહઙ્ગાનામાલવાલામ્બુપાયિનમ્ ॥ ૧-૫૧॥

આતપાત્યયસંક્ષિપ્તનીવારાસુ નિષાદિભિઃ ।
મૃગૈર્વર્તિતરોમન્થમુટજાઙ્ગનભૂમિષુ ॥ ૧-૫૨॥

અભ્યુત્થિતાગ્નિપિશુનૈરતિથીનાશ્રમોન્મુખાન્ ।
પુનાનં પવનોદ્ધૂતૈર્ધૂમૈરાહુતિગન્ધિભિઃ ॥ ૧-૫૩॥

અથ યન્તારમાદિશ્ય ધુર્યાન્વિશ્રામયેતિ સઃ ।
તામવારોહયત્પત્નીં રથાદવતતાર ચ ॥ ૧-૫૪॥

તસ્મૈ સભ્યાઃ સભાર્યાય ગોપ્ત્રે ગુપ્તતમેન્દ્રિયાઃ ।
અર્હણામર્હતે ચક્રુર્મુનયો નયચક્ષુષે ॥ ૧-૫૫॥

વિધેઃ સાયન્તનસ્યાન્તે સ દદર્શ તપોનિધિમ્ ।
અન્વાસિતમરુન્ધત્યા સ્વાહયેવ હવિર્ભુજમ્ ॥ ૧-૫૬॥

તયોર્જગૃહતુઃ પાદાન્રાજા રાજ્ઞી ચ માગધી ।
તૌ ગુરુર્ગુરુપત્ની ચ પ્રીત્યા પ્રતિનનન્દતુઃ ॥ ૧-૫૭॥

તમાતિથ્યક્રિયાશાન્તરથક્ષોભપરિશ્રમમ્ ।
પપ્રચ્છ કુશલં રાજ્યે રાજ્યાશ્રમમુનિં મુનિઃ ॥ ૧-૫૮॥

અથાથર્વનિધેસ્તસ્ય વિજિતારિપુરઃ પુરઃ ।
અર્થ્યામર્થપતિર્વાચમાદદે વદતાં વરઃ ॥ ૧-૫૯॥

ઉપપન્નં નનુ શિવં સપ્તસ્વઙ્ગેષુ યસ્ય મે ।
દૈવીનાં માનુષીણાં ચ પ્રતિકર્તા ત્વમાપદામ્ ॥ ૧-૬૦॥

તવ મન્ત્રકૃતો મન્ત્રૈર્દૂરાત્પ્રશમિતારિભિઃ ।
પ્રત્યાદિશ્યન્ત ઇવ મે દૃષ્ટલક્ષ્યભિદઃ શરાઃ ॥ ૧-૬૧॥

હવિરાવર્જિતં હોતસ્ત્વયા વિધિવદગ્નિષુ ।
વૃષ્ટિર્ભવતિ સસ્યાનામવગ્રહવિશોષિણામ્ ॥ ૧-૬૨॥

પુરુષાયુષ્યજીવિન્યો નિરાતઙ્કા નિરીતયઃ ।
યન્મદીયાઃ પ્રજાસ્તસ્ય હેતુસ્ત્વદ્બ્રહ્મવર્ચસમ્ ॥ ૧-૬૩॥

ત્વયૈવં ચિન્ત્યમાનસ્ય ગુરુણા બ્રહ્મયોનિના ।
સાનુબન્ધાઃ કથં ન સ્યુઃ સંપદો મે નિરાપદઃ ॥ ૧-૬૪॥

કિન્તુ વધ્વાં તવૈતસ્યામદૃષ્ટસદૃશપ્રજમ્ ।
ન મામવતિ સદ્વીપા રત્નસૂરપિ મેદિની ॥ ૧-૬૫॥

નૂનં મત્તઃ પરં વંશ્યાઃ પિણ્ડવિચ્છેદદર્શિનઃ ।
ન પ્રકામભુજઃ શ્રાદ્ધે સ્વધાસંગ્રહતત્પરાઃ ॥ ૧-૬૬॥

મત્પરં દુર્લભં મત્વા નૂનમાવર્જિતં મયા ।
પયઃ પૂર્વૈઃ સ્વનિઃશ્વાસૈઃ કવોષ્ણમુપભુજ્યતે ॥ ૧-૬૭॥

સોઽહમિજ્યાવિશુદ્ધાત્મા પ્રજાલોપનિમીલિતઃ ।
પ્રકાશશ્ચાપ્રકાશશ્ચ લોકાલોક ઇવાચલઃ ॥ ૧-૬૮॥

લોકાન્તરસુખં પુણ્યં તપોદાનસમુદ્ભવમ્ ।
સંતતિઃ શુદ્ધવંશ્યા હિ પરત્રેહ ચ શર્મણે ॥ ૧-૬૯॥

તયા હીનં વિધાતર્માં કથં પશ્યન્ન દૂયસે ।
સિક્તં સ્વયમિવ સ્નેહાદ્વન્ધ્યમાશ્રમવૃક્ષકમ્ ॥ ૧-૭૦॥

અસહ્યપીડં ભગવન્નૃણમન્ત્યમવેહિ મે ।
અરુન્તુદમિવાલાનમનિર્વાણસ્ય દન્તિનઃ ॥ ૧-૭૧॥

તસ્માન્મુચ્યે યથા તાત સંવિધાતું તથાર્હસિ ।
ઇક્ષ્વાકૂણાં દુરાપેઽર્થે ત્વદધીના હિ સિદ્ધયઃ ॥ ૧-૭૨॥

ઇતિ વિજ્ઞાપિતો રાજ્ઞા ધ્યાનસ્તિમિતલોચનઃ ।
ક્ષણમાત્રમૃષિસ્તસ્થૌ સુપ્તમીન ઇવ હ્રદઃ ॥ ૧-૭૩॥

સોઽપશ્યત્પ્રણિધાનેન સન્તતેઃ સ્તમ્ભકારણમ્ ।
ભાવિતાત્મા ભુવો ભર્તુરથૈનં પ્રત્યબોધયત્ ॥ ૧-૭૪॥

પુરા શક્રમુપસ્થાય તવોર્વીં પ્રતિ યાસ્યતઃ ।
આસીત્કલ્પતરુચ્છાયામાશ્રિતા સુરભિઃ પથિ ॥ ૧-૭૫॥

ધર્મલોપભયાદ્રાજ્ઞીમૃતુસ્નાતામનુસ્મરન્ ।
પ્રદક્ષિણક્રિયાર્હાયાં તસ્યાં ત્વં સાધુ નાચરઃ ॥ ૧-૭૬॥

અવજાનાસિ માં યસ્માદતસ્તે નાભવિષ્યતિ ।
મત્પ્રસૂતિમનારાધ્ય પ્રજેતિ ત્વાં શશાપ સા ॥ ૧-૭૭॥

સ શાપો ન ત્વયા રાજન્ન ચ સારથિના શ્રુતઃ ।
નદત્યાકાશગઙ્ગાયાઃ સ્રોતસ્યુદ્દામદિગ્ગજે ॥ ૧-૭૮॥

ઈપ્સિતં તદવજ્ઞાનાદ્વિદ્ધિ સાર્ગલમાત્મનઃ ।
પ્રતિબધ્નાતિ હિ શ્રેયઃ પૂજ્યપૂજાવ્યતિક્રમઃ ॥ ૧-૭૯॥

હવિષે દીર્ઘસત્રસ્ય સા ચેદાનીં પ્રચેતસઃ ।

ભુજઙ્ગપિહિતદ્વારં પાતાલમધિતિષ્ઠતિ ॥ ૧-૮૦॥

સુતાં તદીયાં સુરભેઃ કૃત્વા પ્રતિનિધિં શુચિઃ ।
આરાધય સપત્નીકઃ પ્રીતા કામદુઘા હિ સા ॥ ૧-૮૧॥

ઇતિ વાદિન એવાસ્ય હોતુરાહુતિસાધનમ્ ।
અનિન્દ્યા નંદિની નામ ધેનુરાવવૃતે વનાત્ ॥ ૧-૮૨॥

લલાટોદયમાભુગ્નં પલ્લવસ્નિગ્ધપાટલા ।
બિભ્રતી શ્વેતરોમાઙ્કં સન્ધ્યેવ શશિનં નવમ્ ॥ ૧-૮૩॥

ભુવં કોષ્ણેન કુણ્ડોધ્ની મેધ્યેનાવભૃથાદપિ ।
પ્રસ્રવેણાભિવર્ષન્તી વત્સાલોકપ્રવર્તિના ॥ ૧-૮૪॥

રજઃકણૈઃ ખુરોદ્ધૂતૈઃ સ્પૃશદ્ભિર્ગાત્રમન્તિકાત્ ।
તીર્થાભિષેકજાં શુદ્ધિમાદધાના મહીક્ષિતઃ ॥ ૧-૮૫॥

તાં પુણ્યદર્શનાં દૃષ્ટ્વા નિમિત્તજ્ઞસ્તપોનિધિઃ ।
યાજ્યમાશંસિતાવન્ધ્યપ્રાર્થનં પુનરબ્રવીત્ ॥ ૧-૮૬॥

અદૂરવર્તિનીં સિદ્ધિં રાજન્ વિગણયાત્મનઃ ।
ઉપસ્થિતેયં કલ્યાણી નામ્નિ કીર્તિત એવ યત્ ॥ ૧-૮૭॥

વન્યવૃત્તિરિમાં શશ્વદાત્માનુગમનેન ગામ્ ।
વિદ્યામભ્યસનેનેવ પ્રસાદયિતુમર્હસિ ॥ ૧-૮૮॥

પ્રસ્થિતાયાં પ્રતિષ્ઠેથાઃ સ્થિતાયાં સ્થિતિમાચરેઃ ।
નિષણ્ણાયાં નિષીદાસ્યાં પીતામ્ભસિ પિબેરપઃ ॥ ૧-૮૯॥

વધૂર્ભક્તિમતી ચૈનામર્ચિતામા તપોવનાત્ ।
પ્રયતા પ્રાતરન્વેતુ સાયં પ્રત્યુદ્વ્રજેદપિ ॥ ૧-૯૦॥

ઇત્યાપ્રસાદાદસ્યાસ્ત્વં પરિચર્યાપરો ભવ ।
અવિઘ્નમસ્તુ તે સ્થેયાઃ પિતેવ ધુરિ પુત્રિણામ્ ॥ ૧-૯૧॥

તથેતિ પ્રતિજગ્રાહ પ્રીતિમાન્સપરિગ્રહઃ ।
આદેશં દેશકાલજ્ઞઃ શિષ્યઃ શાસિતુરાનતઃ ॥ ૧-૯૨॥

અથ પ્રદોષે દોષજ્ઞઃ સંવેશાય વિશાંપતિમ્ ।
સૂનુઃ સૂનૃતવાક્સ્રષ્ટુર્વિસસર્જોર્જિતશ્રિયમ્ ॥ ૧-૯૩॥

સત્યામપિ તપઃસિદ્ધૌ નિયમાપેક્ષયા મુનિઃ ।
કલ્પવિત્કલ્પયામાસ વન્યામેવાસ્ય સંવિધામ્ ॥ ૧-૯૪॥

નિર્દિષ્ટાં કુલપતિના સ પર્ણશાલા-
મધ્યાસ્ય પ્રયતપરિગ્રહદ્વિતીયઃ ।
તચ્છિષ્યાધ્યનનિવેદિતાવસાનાં
સંવિષ્ટઃ કુશશયને નિશાં નિનાય ॥ ૧-૯૫॥

॥ ઇતિ શ્રીમત્કાલિદાસકૃતે રઘુવંશે મહાકાવ્યે પ્રથમઃ સર્ગઃ ॥

Encoding by Arvind Kolhatkar and Mrs. and Mr. Desriraju H. Rao.
Proofread and corrected by Arvind Kolhatkar akolhatkar at rogers.com
and Avinash Sathaye

*Raghuvansha by Kalidas Chapter 1*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*